# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर्, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रीद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ६/८** (C. C.- 2.3.6. Old & New ) | **गुणाः - ७०** |
| विषयः - कर्मकाण्डम् | | |
| दिनाङ्कः - १०-१२/१२/२०१८ | **शुक्ल-यजुर्वेद-संहिता ( महीधरभाष्यम् ) अध्याय-३-४** | **समयः -२.०० तः ०५.००** |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु द्वावेव मन्त्रौ व्याख्यायेताम् ( अधीतभाष्यलोके )** **( १० )**

(क) आयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः । पितरं च प्रयन्त्स्वः ।

(ख) राजन्तमध्वराणां गोपामृतस्य दीदिवम् ।
वर्धमान्ꣳस्वे दमे ॥

(ग) तत्सविर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ॥

**प्रश्नः २ अधोलिखितोयरन्यतर एव प्रश्नः समाधीयताम् ।** **( १० )**

(क) माध्यन्दिनसंहितायाः तृतीयाध्यायमाश्रित्य अग्निदेवतायाः सामान्यं स्वरूपमुपपादयत ।

(ख) माध्यन्दिनसंहितायाः तृतीयाध्यायमाश्रित्य अग्न्याधानविषये यथाधीतं लिखत ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधस्तान्निर्दिष्टेषु द्वावेव मन्त्रौ महीधरभाष्यानुसारं व्याख्यायेताम् ।** **( १० )**

(क) अ क्रन्कर्म कर्मकृतः सहवाचा मयोभुवा ।
देवेभ्यः कर्म कृत्वास्त प्रेत सचाभुवः ॥

(ख) पूर्णा दर्वि परापत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणावहा इषमूर्जꣳशतक्रतो ॥

(ग) देहि मे ददामि ते नि मे धेहि नि ते दधे ।
निहारं च हरसि मे निहारं निह्वराणि ते स्वाहा ॥

**प्रश्नः ४ माध्यन्दिनसंहितायाः तृतीयाध्यायगतमन्त्राधारेण धनप्रपकदेवानां विषये यथाज्ञानं लिखत ।** **( १० )**

**( अथवा )**

**माध्यन्दिनसंहितायाः तृतीयाध्यायगतमन्त्रेषु वनस्पत्यौषधीनां विषये यथाज्ञानं लिखत ।**

## तृतीयान्वितिः

**प्रश्नः ५ अधो निर्दिष्टेषु द्वावेव मन्त्रयोः महीधरभाष्यानुसारं व्याख्या विधीयताम् । (१०)**

(क) आ वो देवास ईमहे वामं प्रयत्यध्वरे ।
आ वो देवास आशिषो य ज्ञियासो हवामहे ॥

(ख) ऋक्सामयोः शिल्पेस्थस्ते वामार मे ते मा पातमास्य य ज्ञस्योदृचः ।
शर्मासि शर्म मे यच्छ नमस्ते अस्तु मा मा हि ꣳ सीः ॥

(ग) महीनां पयोऽसि वर्चोदा असि वर्चो मे देहि ।
वृत्रास्यासि कनीनकश्चक्षुर्दाअसि चक्षुर्मे देहि ॥

**प्रश्नः ६ अधोलिखितयोः प्रश्नयोः कस्यचिदेक एव प्रश्नः समाधेयः । (१०)**

(क) माध्यन्दिनसंहितायाः चतुर्थाध्यायमाश्रित्य 'सूर्यस्य' — स्वरूपमुपस्थापयत ।

(क) माध्यन्दिनसंहितायाः सामान्यः परिचयः प्रस्तूयताम् ।

## चतुर्थान्वितिः

**प्रश्नः ७ अधोलिखितेषु दशप्रश्नाः एव समाधेयाः । (१०)**

(१) ''बोधयत' - इत्यस्य महीधरानुसारं कोऽर्थः ?

(२) महीधरभाष्यानुसारं दुवस्वत - इत्यस्य कोऽर्थः ?

(३) ''भूम्ना'' - इत्यस्य महीधरभाष्यानुसारं कोऽर्थो भवति ?

(४) माध्यन्दिनसंहितायाः तृतीयाध्याये कियत्यः कण्डिकाः सन्ति ?

(५) ''त्र्यम्बकं यजामहे'' इति मन्त्रः शुक्लयजुर्वेदसंहितायाः कस्मिन् अध्याये पठितोऽस्ति ?

(६) ''व्रते'' - इत्यस्य महीधरानुसारं कोऽर्थो भवति ?

(७) ''सचेमहि'' - इत्यस्य महीधरभाष्यानुसारं कोऽर्थो भवति ?

(८) ''भेषजमसि'' - इति कस्मै देवाय उक्तः शब्दोऽस्ति ?

(९) ''व्रतो वृणुत'' - इति मन्त्रभागोऽस्ति भाष्यं वा ?

(१०) ''उर्गसि'' - इति मन्त्रस्य कुत्र विनियोगः महीधरभाष्यप्रसंगे ?

(११) शुक्लयजुर्वेदम् याज्ञवल्क्य-ऋषिः कस्मात् प्राप्तवान् ?

(१२) काण्वशाखायाः केन वेदेन सम्बन्द्धाऽस्ति ?

(१३) काण्वशाखायाः ब्राह्मणग्रन्थः प्राप्यते न वा ?

(१४) महीधरानुसारं यज्ञपुरुषस्य यज्ञीया तनूः का उच्यते ?

(१५) उवट-महीधरयोः कः प्राचीनोभाष्यकारः ?

--००--